१

श्रीगणेशायनमः वासुदेवेंद्र [illegible] नत्वा [illegible] दंगुरुं मुमुक्षूणांहितार्थायतत्त्वबो
त त धोविधीयते १ साधनचतुष्टय [illegible] कारिणां मोक्षसाधनभूतंतत्त्वविवेकप्र
कारंवक्ष्यामः साधनचतुष्टय [illegible] नित्य [illegible] विवेकः इहामुत्रफलभोगवि
रागः समादिषट्संपत्तिः मुमुक्षु [illegible] नित्यवस्त्वेकंब्रह्मतद्व्यतिरिक्तंसर्वमनि
त्यंअयमेवनित्यानित्यवस्तुवि [illegible] कः इहस्वर्गभोगेषुइच्छाराहित्यं स
मादिसाधनसंपत्तिः का समो [illegible] समाधानंचेतिसमःकः म
नोनिग्रहः दमकः चक्षुरादि [illegible] रमः किं स्वधर्मानुष्ठानमेव ति
तिक्षाका॥शीतोष्णसुखदुःख [illegible] श्रद्धाकीदृशी गुरुवेदांतवाक्यादि
षुविश्वासः श्रद्धासमाधानंकिं [illegible] मुमुक्षुत्वंकिं मोक्षोमेभूयादिति
इच्छा एतत्साधनचतुष्टयंतत [illegible] धिकारिणोभवंति तत्त्वविवे १

[illegible] लक्षणहै

त्र.सि.२

कः कः आत्मासत्यस्तदन्यत्सर्वंमिथ्येति आ[illegible]कं स्थूलसूक्ष्मकारणशरी
राद्व्यतिरिक्तः पंचकोशातीतः सन् अ[illegible]साक्षी सच्चिदानंदस्वरूपः
सन् यस्तिष्ठति स आत्मा स्थूलश[illegible]रं किं प[illegible]कृतपंचमहाभूतैः कृतं सत्कर्म
जन्यं सुखदुःखादिभोगायतनंशरीरं अस्तिजायते वर्धते विपरिणमते अपक्षीय
ते विनश्यतीति षड्विकारवत् एतत्स्थूलंशरीरं सूक्ष्मशरीरं किं अपंचीकृ
तपंचमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगसाधनं ज्ञानेंद्रियाणिपंचकर्मेंद्रियाणि
पंचप्राणादयः पंचमनश्चैकंबुद्धिरेका एवंसप्तदशकलाभिः सहतिष्ठतितत्सूक्ष्मशरीरं
कारणशरीरं किं अनिर्वाच्यानाद्यविद्यारूपंशरीरद्वयस्यकारणमात्रंसत् स्वस्वरू
पाज्ञानंनिर्विकल्पकरूपंयदस्ति तत्[illegible]रणशरीरं अवस्थात्रयंकिं जाग्रत्स्वप्नसु
षुप्त्यवस्था जाग्रदवस्थाका श्रोत्रादिज्ञानेंद्रियैश्शब्दादिविषयैश्चज्ञायते इतियत्त
त्जाग्रदवस्था स्थूलशरीराभिमानी आत्माविश्वइत्युच्यते स्वप्नावस्थाकेचेत्

ति

कर्मकिमितिचेत् इदंशरीरमुत्पाद्यइहलोकेएवंसुखदुःखादिप्रदंयत्कर्मतत्प्रारब्धं
भोगेननष्टंभवतिप्रारब्धकर्मणांभोगादेवक्षयइतिसंचितंकर्मब्रह्मैवाहमितिनि
श्चयात्मकज्ञानेननश्यति आगामिकर्मपिज्ञानेननश्यतिकिंचआगामिकर्मणांन
लिनीदलगतजलवत्ज्ञानीनांसंबंधोनास्तिकिंचयेज्ञानिनंस्तुवंतिभजंतिअर्चयं
तितान्प्रतिज्ञानिकृतंआगामिपुण्यंगच्छतियेज्ञानिनंनिंदंतिद्विषंतिदुःखप्रदानं
कुर्वंति तान्प्रतिज्ञानिकृतंसर्वंआगामिक्रियमाणंयदवाच्यंकर्मपापात्मकंगच्छ
तितथाचश्रुतिः सुहृदःपुण्यकृत्यंद्विषंतःपापकृत्यंगृह्णंतीतितथाचात्मवि
त्संसारंतीर्त्वाब्रह्मानंदमिहैवप्राप्नोतितरतिशोकमात्मविदित्यादिश्रुतितनुंत्य
जतुवाकाश्यांश्वपचस्यगृहेथवा ज्ञानसंप्राप्तिसमयेमुक्तोसौविगताशयः इ
तिस्मृतिः॥इतितत्वबोधःसंपूर्णम्॥ श्रीआचार्येभ्योनमः॥ ॥॥ ॥॥ ॥॥ॐ॥

र्यंतपाधिविनिर्मुक्तं समाधिद..संप.. शुद्धचैतन्यंलक्ष्यं एवंसर्वज्ञत्वादिवि
शिष्टोऽपीश्वरः तत्पदवाच्यः उपाधि..शु..द्धचैतन्यंलक्ष्यं एवं च जीवेश्वरयोश्चे
द बाधकाभाव एवं च वेदांतवा.. सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु येषां ब्रह्मबु
द्धिरुत्पन्नाते जीवन्मुक्ता इत्यर्थः नु न जीवन्मुक्तिकः यथा देहोहं पुरुषोहं ब्राह्म
णोहं क्षत्रियोहं वैश्योहं शूद्रोहमस..ीति दृढनिश्चयस्तथा नाहं ब्राह्मण न शू
द्रः न पुरुषः किंतु असंगः सच्चिदानंदस्वरूपः प्रकाशरूपः सर्वांतर्यामी चिदाका
शरूपोहमस्मि इति दृढनिश्चयरू..परोक्षज्ञानवान्जीवन्मुक्तः ब्रह्मैवाहम
स्मीत्यपरोक्षज्ञानेन निखिलकर्मबंधविनिर्मुक्तः स्यात् कर्माणि कतिविधानि सं
ति चेत् आगामीसंचितप्रारब्धभेदेन त्रिविधः निसंति ज्ञानोत्पत्त्यनंतरं ज्ञानीदेह
कृतं पुण्यपापरूपं कर्म यदस्ति तदागामि..भिधीयते संचितं कर्म किं अनंतको
टिजन्मनां बीजभूतं सत् यत्कर्मजातं पूर्वोपार्जितं तिष्ठति तत्संचितं ज्ञेयं प्रारब्धं

दीयत्वेनत्वातं आत्मानमवति आत्मा [illegible] सच्चिदानंदस्वरूपः सत्कथं कालत्रयेपि
तिष्ठतीतिसत् चित्कथं ज्ञानस्वरूपः आनंद[illegible]सुखस्वरूपः एवंसच्चिदानंदस्वरूपंस्वात्मानं
विजानीयात् अथचतुर्विंशतितत्वोत्पत्तिंवक्ष्यामः ब्रह्माश्रयासत्वरजस्तमोगुणात्मिकामाया
अस्तिततः आकाशःसंभूतः आकाशाद्वायुः वायोस्तेजः तेजसः आपः अद्भ्यःपृथिवीते
षांपंचतत्वानांमध्ये आकाशःसात्विकांशात् श्रोत्रेंद्रियंसंभूतं वायोःसात्विकांशात्त्वगिंद्रियं
3 संभूतं अग्नेःसात्विकांशात् चक्षुरिंद्रियंसंभूतं जलस्य सात्विकांशात् रसनेंद्रियंसंभू
तंपृथिवीसात्विकांशात् घ्राणेंद्रियंसंभूतं एतेषांपंचतत्वानांसमष्टिसात्विकांशात्
संभूतः करणंतद्वृत्तिभेदात् मनोबुध्यहंकारचित्तांतःकरणानिसंभूतानि एतेषांपंचतत्वा
नांमध्ये आकाशस्यराजसांशाद्वागींद्रियंसंभूतं वायोःराजसांशात्पाणींद्रियंसंभूतं वन्हेः
राजसांशात्पादेंद्रियंसंभूतं जलस्यराजसांशात् उपस्थेंद्रियंसंभूतं पृथिवीराजसांशात्
तं गुदेंद्रियंसंभू एतेषांपंचतत्वानांसमष्टिराजसांशात्पंचप्राणाःसंभूतः एतेषांपंचत

त्वानां तामसांशात् पंचीकरणं भवति पंचीकरणं कथमिति चेत् एतेषां पंचमहाभूता
नां तामसांशस्वरूपं एकमेकं भूतं द्विधा विभज्य एकमेकमर्द्धं तूष्णीं व्यवस्था
प्यन्यमपरमपरमर्द्धं चतुर्धा विभज्य स्वार्द्धमन्येषु अर्द्धेषु स्वभागचतुष्टयसंयोजनं
कार्यं तदा पंचीकरणं भवति एतेभ्यः पंचीकृतपंचमहाभूतेभ्यः तदा स्थूलशरीरं भ
वति एवं पिंडब्रह्माण्डयोरैक्यं संभवति स्थूलशरीराभिमानी जीवनामकं ब्र
ह्मप्रतिबिंबं भवति स एव जीवः प्रकृत्या स्वस्मात् ईश्वरं भिन्नत्वेन जानाति अविद्यो
पाधिः सन् आत्मा जीव इत्युच्यते मायोपाधिः सन् ईश्वर इत्युच्यते एवमुपाधिभेदा
ज्जीवेश्वरभेददृष्टिर्यावत्पर्यंतं तिष्ठति तावत्पर्यंतं जन्ममरणादिरूपसंसारो न निव
र्तते तस्मात्कारणात् न जीवेश्वरभेदबुद्धिः कार्या ननु साहंकारस्य किंचिज्ज्ञस्य जी
वस्य निरहंकारस्य सर्वज्ञस्येश्वरस्य तत्त्वमसीति महावाक्यात् कथमभेदबुद्धिः
स्यादुभयोर्विरुद्धधर्माक्रांतत्वादिति चे ... स्थूलसूक्ष्मशरीराभिमानी त्वंपदवाच्या